श्रीगुरुगीता



स्वामी नित्यानन्द

Acc. 23864

वेदान्त ६८८

"सत्यम्"

सत्यमेवं बहुजनहिताय, भगवता श्रीकृष्णद्वैपायनंवेदव्यासमहर्षिणा विविध-पुराणरचना कृता । तेषां स्कन्दपुराणान्तर्गत उत्तरखंडे श्रीव्यासस्य प्रासादिका वाग् अस्ति सैव गुरुगीता स्मरणीया मननीया च वर्तते । भगवता महादेवेन शिवपार्वतीसंवादे यदुक्तं गूढं रहस्यं तदेव विशदीकृत्य भगवता मुनिना व्यासेन गुरुगीता प्रकटीकृता । अनन्यार्श्चिन्तयन्तो जनाः गुरोः शरणं नीत्वा आत्मज्ञानं प्राप्नुवन्ति ।

न शास्त्रात् प्राप्यते ज्ञानं न तु तर्कवितर्कनात् ।
प्राप्यतेऽध्यात्मज्ञानं तु केवलं गुरुसेवनात् ॥

भगवता नन्दनन्दनश्रीकृष्णचन्द्रेण उक्तं च गीतायां हे अर्जुन !

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः ॥
भ.गी,अ.८,३४

ज्ञात्वैवं, साधकमनसि, तीव्रः भावः उत्पद्यते । किं करोमि क्व गच्छामि, कथं प्राप्स्यते सद्गुरुः, येन संसारार्णवात् सद्यः मुक्तिं प्राप्नोति मानवः । मुहुर्मुहुः विचारणात् ध्यानात् च साधकः सत् शिष्यत्वं लभते । यथा कीटो भ्रमरीरिव तत् क्षणादेव साधकं तं सद्गुरुदर्शनं भवति भवार्णवं च तारयति सः। नाल्पग्रंथः गुरुगीता, संसारोगनिवृत्त्यै स्वलपापि रसायनीमात्रा व्याधिं निर्मूलं च कुरुते । अतः आदौ गुरुगीताध्ययनं शस्यं, गुरु शरणं तत्:परम्। तत् कृपाप्रसादेन भविष्यति आत्मदर्शनम् । अतएव

रटनीया गुरुगीता, पठनीया मुहुर्मुहुः ।
गुरुगीताप्रसादेन नित्यानन्दो भविष्यति ॥

"शिवम्"

आरती

जय जय आरती नित्यानन्दा (२)
सगुणारूपी गोविंदा (२)
जय जय आरती नित्यानन्दा (२)

प्रथम दत्तरूप होशी, (२)
द्वितीया श्रीपाद होशी, (२)
तृतीया नरहरि होशी, (२)
गाणगापुर लीला करीशी, जय जय

माणेकप्रभु तु होशी, (२)
अक्कलकोट स्वामी होशी, (२)
शिरडी साईनाथ होशी, (२)
कलीयुगी नित्यानन्द होशी, जय जय

ऐसी अनेक रूप तु घेशी, (२)
गणेशपुरी तु वससी, (२)
कांजनगढ तु वससी (२)
भक्तांची इच्छा पूरवीशी, (२)
बाळाला बहु आवडशी, जय जय ...

॥ ॐ ॥

ॐ नमः पार्वतीपतये हर हर हर महादेव ।

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाऽक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते, सहस्रकोटीयुगधारिणे नमः ॥

ॐ नमः शिवाय गुरवे सच्चिदानन्दमूर्तये ।
निष्प्रपञ्चाय शान्ताय निरालम्बाय तेजसे ॥

नित्यानन्दाय गुरवे शिष्यसंसारहारिणे ।
भक्तकार्यैकदेहाय नमस्ते चित्सदात्मने ॥

ॐ सह नाववतु । सह नौ भुनक्तु ।
सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु ।
मा विद्विषावहै ।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

श्री गुरुपादुकापञ्चकम्

ॐ नमो गुरुभ्यो गुरुपादुकाभ्यो
नमः परेभ्यः परपादुकाभ्यः ।
आचार्यसिद्धेश्वरपादुकाभ्यो
नमो नमः श्रीगुरुपादुकाभ्यः ॥ १ ॥

अर्थः सर्वेभ्यो गुरुभ्यः नमः । गुरुपादुकाभ्यः नमः । परमगुरुभ्यः (श्रीगुरुदेवस्य गुरुभ्यः) नमः । तेषां पादुकाभ्योऽपि नमः। आचार्य्याणां सिद्धविद्यास्वामिनां च पादुकाभ्यो नमः । भूयो भूयः श्री गुरुपादुकाभ्यः नमः ॥ १ ॥

ऐंकारह्रींकाररहस्ययुक्त -
श्रींकारगूढार्थमहाविभूत्या ।
ॐ कारमर्मप्रतिपादिनीभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ २ ॥

अर्थः याभ्यां वाग्बीजस्य ऐंकारस्य, मायाबीजस्य ह्रींकारस्य च रहस्ययुक्तया षोडशी बीजश्रींकारगूढार्थं महाविभूत्यां ॐ कारस्य मर्मस्थानं प्रकाश्यते। ताभ्यां गुरुपादुकाभ्यां नमः ॥ २ ॥

होत्राग्निहौत्राग्निहविष्यहोतृ -
होमादिसर्वाकृतिभासमानम् ।
यद् ब्रह्म तद्बोधवितारिणीभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ३ ॥

अर्थ होताग्नौ, हौत्राग्नौ, हवनसामग्र्यां होमकर्त्तरि, होमादिषु सर्वेषु च भासमानं ब्रह्मतत्त्वं ये पादुके बोधयतः, ताभ्यां गुरुपादुकाभ्यां नमः ॥ ३ ॥

कामादिसर्पव्रजगारुडाभ्यां
विवेकवैराग्यनिधिप्रदाभ्याम् ।
बोधप्रदाभ्यां द्रुतमोक्षदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ४ ॥

अर्थ ये अन्तःकरणस्थ कामक्रोधादिसर्पाणां विषविनाशाय विषवैद्यस्वरूपे, विवेकवैराग्यरूपनिधिप्रदायिन्यौ, ये बोधप्रदायिन्यौ, मोक्षप्रदायिन्यो च ताभ्यां गुरुपादुकाभ्यां नमो नमः ॥ ४ ॥

अनन्तसंसारसमुद्रतार –
नौकायिताभ्यां गुरुभक्तिदाभ्याम् ।
जाड्याब्धिसंशोषणवाडवाभ्यां ।
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ५ ॥

अर्थ ये अनन्तसंसाररूपस्य समुद्रस्य तरणाय नौकारूपे, गुरु भक्तिदायिके, प्रमादालस्याज्ञानरूप जडतासमुद्रस्य शोषणाय वाडवाग्निरूपे, ताभ्यां गुरुपादुकाभ्यां नमो नमः ॥ ५ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

श्रीगुरुगीता

अथ श्रीगुरुगीताप्रारंभः ।

ॐ अस्य श्रीगुरुगीतास्तोत्रमंत्रस्य भगवान्
सदाशिव ऋषिः। नानाविधानि छन्दांसि ।
श्रीगुरुपरमात्मा देवता । हं बीजं । सः शक्तिः ।
क्रों कीलकं । श्रीगुरुप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

॥ अथ ध्यानम् ॥

हंसाभ्यां परिवृत्तपत्रकमलैर्दिव्यैःजगत्कारणैर्
विश्वोत्कीर्णमनेकदेहनिलयैः स्वच्छन्दमात्मेच्छया ।
तद्द्योतं पदशाम्भवं तु चरणं दीपांकुरग्राहिणं
प्रत्यक्षाक्षरविग्रहं गुरुपदं ध्यायेद्विभुं शाश्वतम् ॥

मम चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ।

अर्थ जगतः कारणरूपं, दिव्यकमलस्य द्वाभ्यां पत्राभ्यां विश्वोत्पत्यर्थं अनेकदेहेषु स्वेच्छया स्वच्छन्दरूपेण सततं निवसन्तं, परमशिवपदेन स्वयं दीप्तं चरणकमलाकारं, दीपज्योतेः शिखासदृशं साक्षात् अक्षरस्वरूपं गुरुं ध्यायेत् ।

ऋषयः ऊचुः

गुह्यात् गुह्यतरा विद्या गुरुगीता विशेषतः ।
ब्रूहि नः सूत कृपया शृणुमस्त्वत्प्रसादतः ॥

अर्थ हे सूत ! अस्माकं विशेषतः गूढतमा गुरुगीताविद्या कथय । तव कृपया वयं श्रुणुमः ।

सूत उवाच
कैलासशिखरे रम्ये भक्तिसंधाननायकम् ।
प्रणम्य पार्वती भक्त्या शंकरं पर्यपृच्छत ॥ १ ॥

अर्थ एकदा रमणीय कैलासपर्वतशिखरे देवी पार्वती भक्तिसंधानकुशलं शिवं भक्त्या प्रणम्य पृष्टवती ॥ १ ॥

श्री देव्युवाच
ॐ नमो देवदेवेश परात्पर जगद्गुरो।
सदाशिव महादेव गुरुदीक्षां प्रदेहि मे ॥ २ ॥
केन मार्गेण भोः स्वामिन् देही ब्रह्ममयो भवेत् ।
त्वं कृपां कुरु मे स्वामिन् नमामि चरणौ तव ॥ ३ ॥

अर्थः देवी अवदत् हे देवाधिदेव ! महादेव ! हे परात्पर जगद्गुरो। हे सदाशिव ! कृपया मह्यं गुरुदीक्षां प्रदेहि ॥ २ ॥
हे स्वामिन् ! केन साधनमार्गेण देही ब्रह्ममयः भवेत् ? त्वं मयि कृपां कुरु । अहं तव चरणौ नमामि ॥ ३ ॥

ईश्वर उवाच
मम रूपासि देवि त्वं त्वत्प्रीत्यर्थं वदाम्यहम् ।
लोकोपकारकः प्रश्नो न केनाऽपि कृतः पुरा ॥ ४ ॥
दुर्लभं त्रिषु लोकेषु तच्छृणुस्व वदाम्यहम् ।
गुरुं विना ब्रह्म नान्यत् सत्यं सत्यं वरानने ॥ ५ ॥

अर्थ महेश्वरः अवदत् हे देवि त्वं मत्स्वरूपा असि । अहं ते प्रसन्नतायै वदामि, पुरा न कोऽपि ईदृशं लोकोपकारकं प्रश्नं कृतवान् ॥४॥ अयं प्रश्नः त्रिषु लोकेषु दुर्लभः । तस्योत्तरं वदामि, त्वं शृणु, गुरुं विना ब्रह्म अन्यत् किञ्चत् नास्ति । हे वरानने ! एतत् सत्यम्, नात्र संशयः ॥ ५ ॥

वेदशास्त्रपुराणानि इतिहासादिकानि च ।
मंत्रयंत्रादिविद्याश्च स्मृतिरुच्चाटनादिकम् ॥ ६ ॥
शैवशाक्तागमादीनि अन्यानि विविधानि च ।
अपभ्रंशकराणीह जीवानां भ्रान्तचेतसाम् ॥ ७ ॥

अर्थ वेदाः शास्त्राणि पुराणानि इतिहासादीनि, मन्त्रयन्त्रादयः विद्याः स्मृतिः उच्चाटनादिकं शैवशाक्तागमादीनि अन्यानि विविधानि च शास्त्राणि मनुष्याणां चित्तविभ्रमकारणानि भवन्ति ॥ ६,७ ॥

यज्ञो व्रतं तपो दानं जपस्तीर्थं तथैव च ।
गुरुतत्त्वमविज्ञाय मूढास्ते चरते जनाः ॥ ८ ॥

अर्थ गुरुतत्त्वम् अजानन्तः मूढाः मानवाः यज्ञ-व्रत-तपो-दान-जप-तीर्थादीनि आचरन्ति ॥ ८ ॥

गुरुर्बुद्ध्यात्मनो नान्यत् सत्यं सत्यं न संशयः ।
तल्लाभार्थं प्रयत्नस्तु कर्तव्यो हि मनीषिभिः ॥ ९ ॥

अर्थ ज्ञानस्वरूपात् आत्मनः श्रीगुरुः न भिन्नः । इदं सत्यम् नात्र संशयः। अतः बुद्धिमद्भिः मानवैः गुरुप्राप्त्यर्थं प्रयत्नः कर्तव्यः ॥९॥

गूढविद्या जगन्माया देहे चाज्ञानसम्भवा ।
उदयः यत्प्रकाशेन गुरुशब्देन कथ्यते ॥ १० ॥

अर्थ इयं गूढविद्या जगति मायारूपेण तथा शरीरे च अज्ञानरुपेण तिष्ठति। यस्य जागरणेन सत्यज्ञानम् उदयते । इदं तत्त्वं 'गुरु' संज्ञया विज्ञायते ॥ १० ॥

सर्वपापविशुद्धात्मा श्रीगुरोः पादसेवनात् ।
देही ब्रह्मभवेद् यस्मात् त्वत् कृपार्थं वदामि ते ॥११॥

अर्थ श्रीगुरोः चरणसेवया मनुष्यः सर्वपापविमुक्तः सन् विशुद्धात्मा भवति, देहधारी जीवः येन ब्रह्मरूपो भवति, तत्त्वम् अहं तुभ्यं कृपापूर्वकं वदामि ॥ ११ ॥

गुरुपादाम्बुजं स्मृत्वा जलं शिरसि धारयेत् ।
सर्वतीर्थावगाहस्य सम्प्राप्नोति फलं नरः ॥ १२ ॥

अर्थ श्री गुरोः चरणकमलं, स्मृत्वा शिरसि जलधारणेन मनुष्यः सर्वतीर्थस्नानफलं लभते ॥ १२ ॥

शोषणं पापपङ्कस्य दीपनं ज्ञानतेजसाम् ।
गुरुपादोदकं सम्यक् संसारार्णवतारकम् ॥ १३ ॥

अर्थ श्रीगुरोः चरणजलं, पापपङ्कस्य शोषकं, ज्ञानतेजसां दीपकं संसारसागरात् तारकं चास्ति ॥ १३ ॥

अज्ञानमूलहरणं जन्मकर्मनिवारणम् ।
ज्ञानवैराग्यसिद्ध्यर्थं गुरुपादोदकं पिबेत् ॥ १४ ॥

अर्थ गुरुपादोदकं अज्ञानस्य मूलोत्पाटकं, जन्मकर्म निवारकं च भवति। ज्ञानवैराग्यसिद्धयर्थं तस्य गुरुपादोदकस्य पानं विधेयम् ॥ १४ ॥

गुरोः पादोदकं पीत्वा गुरोरुच्छिष्टभोजनम् ।
गुरुमूर्त्तेः सदा ध्यानं गुरुमन्त्रं सदा जपेत् ॥ १५ ॥

अर्थ श्रीगुरोः पादोदकं पीत्वा गुरोः उच्छिष्टं भक्षयेत्। गुरुप्रदत्तमन्त्रजपेन सार्द्धं गुरुमूर्त्तेः ध्यानं प्रत्यहं विधेयम् ॥ १५ ॥

काशीक्षेत्रं तन्निवासो जाह्नवी चरणोदकम् ।
गुरुःविश्वेश्वरः साक्षात् तारकं ब्रह्म निश्चितम् ॥ १६ ॥

अर्थ श्रीगुरोः निवासस्थानं काशीधाम। तस्य चरणोदकं गंगाजलम्। गुरुः साक्षात् विश्वेश्वरः। सोऽपि साक्षात् तारकं ब्रह्मेति निश्चितम् ॥ १६ ॥

गुरोः पादोदकं यत्तु गयाऽसौ सोऽक्षयो वटः ।
तीर्थराजः प्रयागश्च गुरुमूर्त्यै नमो नमः ॥ १७ ॥

अर्थ श्रीगुरोः पादोदकं गयातीर्थम्, सः अक्षयवटः, स एव तीर्थराजः प्रयागः। अस्यै गुरुमूर्त्यै नमो नमः ॥ १७ ॥

गुरुमूर्तिं स्मरेन्नित्यं गुरुनाम सदा जपेत् ।
गुरोराज्ञां प्रकुर्वीत गुरोरन्यन्न भावयेत् ॥ १८ ॥

अर्थ श्रीगुरुमूर्तिं प्रत्यहं स्मरेत्, गुरुप्रदत्त मन्त्रं प्रत्यहं जपेत्, गुरुदेवस्य आज्ञां पालयेत्, गुरुदेवं विहाय अन्यत् वस्तु न चिन्तयेत् ॥१८॥

गुरुवक्त्रस्थितं ब्रह्म प्राप्यते तत्प्रसादतः
गुरोर्ध्यानं सदा कुर्यात् कुलस्त्री स्वपतेर्यथा ॥ १९॥

अर्थ श्रीगुरो : मुखारविन्दस्थित ब्रहा तत्कृपयैव लभ्यते। यथा कुलस्त्री स्वपतेर्ध्यानं निरन्तरं कुरुते तथा गुरुदेवस्य ध्यानं सततं विधेयम् ॥ १९ ॥

स्वाश्रमं च स्वजातिं च स्वकीर्तिपुष्टिवर्धनम् ।
एतत्सर्वं परित्यज्य गुरोरन्यत्र भावयेत् ॥ २० ॥

अर्थ स्वस्य आश्रमं, स्वजातिं, स्वकीर्तिं, स्वस्य समुन्नतिं च परित्यज्य गुरुं विना अन्यस्य कस्यापि भावना न कार्या ॥ २० ॥

अनन्याश्चिन्तयन्तो मां सुलभं परमं पदम् ।
तस्मात् सर्वप्रयत्नेन गुरोराराधनं कुरु ॥ २१ ॥

अर्थ यः अनन्यभावेन मम (शिवरूपिणः गुरोः) चिन्तनं विदधाति। तस्मै परमपदं सुलभं भवति। अतः प्रयत्नपूर्वकं गुरोः आराधनं कुरु ॥ २१ ॥

त्रैलोक्ये स्फुटवक्तारो देवाद्यसुरपन्नगाः ।
गुरुवक्त्रस्थिता विद्या गुरुभक्त्या तु लभ्यते ॥ २२ ॥

अर्थ त्रैलोक्ये देवासुरनागादयः स्पष्टं वर्णयन्ति यत् गुरुदेवस्य मुखारविन्दे विद्यमाना विद्या (सत्यज्ञानम्) गुरुभक्त्यैव लभ्यते ॥ २२ ॥

गुकारस्त्वन्धकारश्च रुकारस्तेज उच्यते ।
अज्ञानग्रासकं ब्रह्म गुरुरेव न संशयः ॥ २३ ॥

अर्थ 'गु'कारस्य अर्थः अन्धकारः, 'रु'कारस्य अर्थः प्रकाशः । गुरुरेव अज्ञाननाशकं ब्रह्म । अत्र कश्चित् संशयः नास्ति ॥ २३ ॥

गुकारः प्रथमो वर्णो मायादिगुणभासकः ।
रुकारो द्वितीयो ब्रह्म मायाभ्रान्तिविनाशनम् ॥ २४ ॥

अर्थ गुरुशब्दस्य प्रथमः वर्णः 'गु' मायादिगुणान् प्रकटयति । द्वितीयः वर्णः 'रु' ब्रह्मद्योतकः भवति यः मायादि भ्रान्तिं विनाशयति ॥२४॥

एवं गुरुपदं श्रेष्ठं देवानामपि दुर्लभम् ।
हाहाहूहूगणैश्चैव गन्धर्वैश्च प्रपूज्यते ॥ २५ ॥

अर्थ इत्थं, गुरुपदं सर्वश्रेष्ठं भवति । तदपि देवानां कृते दुर्लभमस्ति हाहाहूहूगणैः गन्धर्वैश्च तत् पूज्यते ॥ २५ ॥

ध्रुवं तेषां च सर्वेषां नास्ति तत्त्वं गुरोः परम् ।
आसनं शयनं वस्त्रं भूषणं वाहनादिकम् ॥ २६ ॥

साधकेन प्रदातव्यं गुरुसंतोषकारकम् ।
गुरोराराधनं कार्यं स्वजीवित्वं निवेदयेत् ॥ २७ ॥

अर्थ सर्वेषाम् इदं मान्यं यत् गुरुतत्वं विना अपरं किमपि तत्त्वं नास्ति। साधकः गुरवे तत्सन्तोषाय आसन-शयन-वस्त्र-भूषण- वाहनादिकं दद्यात् । श्री गुरोः आराधना विधेया । स्वजीवितस्यापि अर्पणं कार्यम् ॥ २६,२७. ॥

कर्मणा मनसा वाचा नित्यमाराधयेद् गुरुम् ।
दीर्घदण्डं नमस्कृत्य निर्लज्जो गुरुसन्निधौ ॥ २८ ॥

अर्थ सर्वदा कर्मणा मनसा वाण्या च गुरुम् आराधयेत्, श्री गुरुसमीपे लज्जां परित्यज्य दण्डवत् साष्टांगप्रणामः करणीयः ॥ २८ ॥

शरीरमिन्द्रियं प्राणान् सद्गुरुभ्यो निवेदयेत् ।
आत्मदारादिकं सर्वं सद्गुरुभ्यो निवेदयेत् ॥ २९ ॥

अर्थ देहम् इन्द्रियाणि प्राणांश्च सद्गुरुभ्यः समर्पयेत् । आत्मानं पत्न्यादिकं सर्वं प्रियवस्तु च सद्गुरुभ्यः समर्पयेत् ॥ २९ ॥

कृमिकीटभस्मविष्ठा-दुर्गन्धिमलमूत्रकम् ।
श्लेष्मरक्तं त्वचामांसं वञ्चयेन्न वरानने ॥ ३० ॥

अर्थ हे सुन्दरि ! स्वशरीरस्य कृमि-कीट-भस्म-विष्ठा- दुर्गन्ध-मल-मूत्रं-श्लेष्म-रक्त-त्वक्-मांसादिकम अपि गुरोः न वञ्चयेत्, अपितु संपूर्णतया श्रीगुरवे समर्पयेत् ॥ ३० ॥

संसारवृक्षमारुढाः पतन्तो नरकार्णवे ।
येन चैवोद्धृताः सर्वे तस्मै श्रीगुरवे नमः ॥ ३१ ॥

अर्थ यः संसाररूपिवृक्षमारूढान् नरकार्णवे पततः सर्वान् जीवान् उद्धरति तस्मै श्रीगुरवे नमः ॥ ३१ ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परब्रह्म तस्मै श्रीगुरवे नमः ॥ ३२ ॥

अर्थ गुरुरेव ब्रह्मा, गुरुरेव विष्णुः, गुरुरेव शिवः । गुरुरेव परब्रह्म तस्मै श्रीगुरवे नमः ॥ ३२ ॥

हेतवे जगतामेव संसारार्णवसेतवे ।
प्रभवे सर्वविद्यानां शंभवे गुरवे नमः ॥ ३३ ॥

अर्थ यः जगदुत्पत्तये कारणं, संसारसागर तरणाय सेतुः, तथा यः सर्वविद्यानाम् उदयस्थानम् ईदृशाय शिवस्वरूपाय कल्याणकारिणे श्रीगुरवे नमः ॥ ३३ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ३४ ॥

अर्थ अज्ञानरूपेण अन्धकारेण अन्धस्य जीवस्य नेत्रं येन ज्ञानरुपया अञ्जनशलाकया उन्मीलितं, तस्मै श्रीगुरुदेवाय नमः ॥ ३४ ॥

त्वं पिता त्वं च मे माता त्वं बंधुस्त्वं च देवता ।
संसारप्रतिबोधार्थं तस्मै श्रीगुरवे नमः ॥ ३५ ॥

अर्थ संसारस्य सत्यज्ञानबोधार्थं त्वमेव पिता, त्वं माता, त्वं बंधुः त्वं देवता च, तस्मै श्रीगुरवे नमः ॥ ३५ ॥

यत्सत्येन जगत्सत्यं यत्प्रकाशेन भाति तत् ।
यदानन्देन नन्दन्ति तस्मै श्रीगुरवे नमः ॥ ३६ ॥

अर्थ यस्य सत्तायां जगतः सत्ता, यस्य आनन्देन जगदानन्दितं भवति, तस्मै (सच्चिदानन्दरूपाय) श्रीगुरवे नमः ॥ ३६ ॥

यस्य स्थित्या सत्यमिदं यद्भाति भानुरूपतः ।
प्रियं पुत्रादि यत्प्रीत्या तस्मै श्रीगुरवे नमः ॥ ३७ ॥

अर्थ यस्य अवस्थित्या जगत् सत्यं प्रतिभाति, येन सूर्यरूपेण सर्वं प्रकाशितम्, यस्य प्रीत्या पुत्रादिसम्बन्धः प्रीतिकरः प्रतिभाति । तस्मै श्रीगुरवे नमः ॥ ३७ ॥

येन चेतयते हीदं चित्तं चेतयते न यम् ।
जाग्रत्स्वप्नसुषुप्त्यादि तस्मै श्रीगुरवे नमः ॥ ३८ ॥

अर्थ येन इदं जगत् चेतनस्वरूपम् अनुभूयते, परंतु चित्तं यं न प्रकाशयितुं शक्नोति, जाग्रत्-स्वप्न-सुषुप्त्यादयः अवस्थाः येन प्रकाश्यन्ते, चित्स्वरूपाय तस्मै श्रीगुरवे नमः ॥ ३८ ॥

यस्य ज्ञानादिदं विश्वं न दृश्यं भिन्नभेदतः ।
सदेकरूपरूपाय तस्मै श्रीगुरवे नमः ॥ ३९ ॥

अर्थ यस्य ज्ञानात् इदं विश्वं (शिवात्) भिन्नं भेदरूपं वा न दृश्यते, एकमात्रं सद् रूपमेव यस्य स्वरूपम्, तस्मै श्रीगुरवे नमः ॥३९॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अनन्यभावभावाय तस्मै श्रीगुरवे नमः ॥ ४० ॥

अर्थ 'यः कथयति अहं ब्रह्म न जानामि, स एव ज्ञानी । यः कथयति अहं जानामि, स न जानाति' । यः ब्रह्मणः अभेद-भावपूर्णः, तस्मै श्रीगुरवे नमः ॥ ४० ॥

यस्य कारणरूपस्य कार्यरूपेण भाति यत् ।
कार्यकारणरूपाय तस्मै श्रीगुरवे नमः ॥ ४१ ॥

अर्थ कारणरूपात् यस्मात् गुरुदेवात् कार्यरूपं जगत् प्रकाशितं भवति, तस्मै कार्यकारणरूपाय श्रीगुरवे नमः ॥ ४१ ॥

नानारूपमिदं सर्वं न केनाप्यस्ति भिन्नता ।
कार्यकारणता चैव तस्मै श्रीगुरवे नमः ॥ ४२ ॥

अर्थ नानारुपवति अस्मिन् जगति कुत्रापि काऽपि भिन्नता नास्ति । केवलः कार्यकारण भाव एवास्ति, तस्मै श्रीगुरवे नमः ॥४२॥

यदङ्घ्रिकमलद्वन्द्वं द्वन्द्वतापनिवारकम् ।
तारकं सर्वदाऽऽपद्भ्यः श्रीगुरुं प्रणमाम्यहम् ॥ ४३ ॥

अर्थ यस्य चरणकमलयुगलं सुखदुःख-शीतोष्णादि द्वन्द्वतापं निवारयति, आपदभ्यश्च सदा उद्धरति, तादृशं श्रीगुरुम् अहं प्रणमामि ॥४३॥

शिवे क्रुद्धे गुरुस्त्राता गुरौ क्रुद्धे शिवो न हि ।
तस्मात्सर्वप्रयत्नेन श्रीगुरुं शरणं व्रजेत् ॥ ४४ ॥

अर्थ शिवे रुष्टे गुरुः त्रायते, परंतु गुरौ रुष्टे शिवः त्रातुं न प्रभवति। ततः सर्वप्रयत्नेन श्रीगुरुं शरणं गच्छेत् ॥ ४४ ॥

वन्दे गुरुपदद्वन्द्वं वाङ्मनश्चित्तगोचरम् ।
श्वेतरक्तप्रभाभिन्नं शिवशक्त्यात्मकं परम् ॥ ४५ ॥

अर्थ परशिवस्वरूपं पराशक्तिस्वरूपं च, श्वेतारुणप्रभायुक्तं, मनोवाणीचित्तगोचरं श्रीगुरोश्चरणयुगलम् अहं वन्दे ॥ ४५ ॥

गुकारं च गुणातीतं रुकारं रूपवर्जितम् ।
गुणातीतस्वरूपं च यो दद्यात् स गुरुः स्मृतः ॥ ४६ ॥

अर्थ 'गु'कारः गुणातीतं 'रु'कारश्च रूपातीतं प्रकटयति । यः गुणरूपातीतं (निर्गुणं निराकारं च) आत्मस्वरूपं प्रददाति, स गुरुः इति उच्चते ॥ ४६ ॥

अ-त्रिनेत्रः सर्वसाक्षी अ-चतुर्बाहुरच्युतः ।
अ-चतुर्वदनो ब्रह्मा श्रीगुरुः कथितः प्रिये ॥४७॥

अर्थ हे प्रिये, नेत्रत्रयरहितोऽपि यः सर्वसाक्षी शिवस्वरूपः, चतुर्भुजहीनोऽपि विष्णुः अचतुर्वदनोऽपि- हे ब्रह्माऽस्ति, स श्रीगुरुरिति कथ्यते ॥ ४७ ॥

अयं मयाञ्जलिर्बद्धो दयासागरवृद्धये ।
यदनुग्रहतो जन्तुश्चित्रसंसारमुक्तिभाक् ॥ ४८ ॥

अर्थ दयासागरं तं श्रीगुरुम् अहं बद्धाञ्जलिः सन् प्रणमामि,यस्य कृपया जीवः अस्मात् भेदात्मकसंसारात् मुक्ति लभते ॥ ४८ ॥

श्रीगुरोः परमं रूपं विवेकचक्षुषोऽमृतम् ।
मन्दभाग्या न पश्यन्ति अन्धाः सूर्योदयं यथा ॥ ४९ ॥

अर्थ विवेकचक्षुषः कृते श्रीगुरोः परमं रूपम् अमृततुल्यं भवति, यथा अन्धाः सूर्योदयं न पश्यन्ति, तथा मन्दभाग्याः श्रीगुरोः तदमृतरूपं न पश्यन्ति ॥ ४९ ॥

श्रीनाथचरणद्वन्द्वं यस्यां दिशि विराजते ।
तस्यै दिशे नमस्कुर्याद् भक्त्या प्रतिदिनं प्रिये ॥ ५० ॥

अर्थ हे प्रिये, यस्यां दिशि श्रीगुरुदेवस्य चरणयुगलं विराजते, तस्यै दिशे प्रतिदिनं भक्तिपूर्वकं नमस्कुर्य्यात् ॥ ५० ॥

तस्यै दिशे सततमञ्जलिरेष आर्ये
प्रक्षिप्यते मुखरितो मधुपैर्बुधैश्च ।
जागर्ति यत्र भगवान् गुरुचक्रवर्ती
विश्वोदयप्रलयनाटकनित्यसाक्षी ॥ ५१ ॥

अर्थ हे आर्ये, यस्यां दिशि विश्वोत्पत्ति-प्रलयरूपनाटकस्य नित्यसाक्षी भगवान् चक्रवर्ती गुरुदेवः जागर्ति, विद्वांसः मन्त्रोच्चारणपूर्वकं तस्यै दिशे भ्रमरमुखरितसुगन्धितपुष्पाञ्जलि समर्पयन्ति ॥ ५१ ॥

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं बटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीरान् द्व्यष्ट-चतुष्क-षष्टि-नवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमंत्रराजसहितं वन्दे गुरोर्मण्डलम् ॥ ५२ ॥

अर्थ श्रीगुरुदेवं परमगुरुदेवं परात्परगुरुदेवं चेति श्रीनाथादिगुरुत्रयं, गणपति-कामरूप-पूर्णगिरिजालंधराख्यं पीठत्रयं, मन्थानादीन् अष्ट भैरवान्, सिद्धसमूहं, विरंचि-चक्र, स्कन्दारव्यं बटुकत्रयं, प्रकाश-विमर्शाख्यं चरणयुगलं, योन्यम्बादिदूतीमण्डलं, अग्निमण्डल-सूर्यमण्डल- सोममण्डलादि मण्डलं, दशवीरान, चतुःषष्टियोगिनीः, सर्वसंशोधिन्यादयः नव मुद्राः ब्रह्मविष्णुरुद्रेश्वरसदाशिवान् पञ्चवीरान्, अकारत् क्षकारपर्यन्तम् एकपञ्चाशन्मात्रायुक्तं मालिनीमन्त्रं च नीत्वा गुरोर्मण्डलमस्ति । तत् तत्त्वयुक्तं मण्डलमहं नमामि ॥५२॥

अभ्यस्तैः सकलैः सुदीर्घमनिलैः व्याधिप्रदैर्दुष्करैः
प्राणायामशतैरनेककरणैर्दुःखात्मकैर्दुर्जयैः ।
यस्मिन्नभ्युदिते विनश्यति बली वायुःस्वयं तत्क्षणात्
प्राप्तुं तत्सहजं स्वभावमनिशं सेवध्वमेकं गुरुम् ॥ ५३ ॥

अर्थ दुःखदायकेन व्याधिकारकेण इन्द्रियसन्तापकेन दुर्जयेन दीर्घश्वासक्रियारूपेण शतसंख्यकप्राणायामाभ्यासेन किंफलम् ? यस्य उदयमात्रेण बलवान् वायुः तत् क्षणात् स्वयं प्रशाम्यति, तत्सहजात्मभावलाभाय निरन्तरं गुरुसेवा विधेया ॥५३ ॥

स्वदेशिकस्यैव शरीरचिन्तनं
भवेदनन्तस्य शिवस्य चिन्तनम् ।
स्वदेशिकस्यैव च नामकीर्तनं
भवेदनन्तस्य शिवस्य कीर्तनम् ॥ ५४ ॥

अर्थ स्वगुरुदेवशरीरस्य (स्वरूपस्य) चिन्तनं अनन्तशिवस्वरूप चिन्तनेन सममस्वगुरुदेवनामकीर्तनं (गुरुमन्त्रकीर्तनं) अनंत शिवनामकीर्तनं तुल्यमस्ति ॥ ५४ ॥

यत्पादरेणुकणिका काऽपि संसारवारिधेः ।
सेतुबंधायते नाथं देशिकं तमुपास्महे ॥ ५५ ॥

अर्थ यस्य चरणरजःकणिका सेतुबन्धवत् संसारसागरतरणाय जायते, तस्य गुरुनाथस्य उपासनामहं करोमि ॥ ५५ ॥

यस्मादनुग्रहं लब्ध्वा महदज्ञानमुत्सृजेत् ।
तस्मै श्रीदेशिकेन्द्राय नमश्चाभीष्टसिद्धये ॥ ५६ ॥

अर्थ यस्य अनुग्रहलाभेन महद-अज्ञानं नश्यति, तं गुरुदेवं स्वाभीष्टसिद्धये नमस्करोमि ॥ ५६ ॥

पादाब्जं सर्वसंसारदावानलविनाशकम् ।
ब्रह्मरन्ध्रे सिताम्भोजमध्यस्थं चन्द्रमण्डले ॥ ५७ ॥
अकथादित्रिरेखाब्जे सहस्रदलमण्डले ।
हंसाणार्श्वत्रिकोणे च स्मरेत्तन्मध्यगं गुरुम् ॥ ५८ ॥

अर्थ यस्य चरणकमलं संसारस्य सर्वदावानलविनाशकं, तस्य गुरुदेवस्य ध्यानं ब्रह्मरन्ध्रे, चन्द्रमण्डलाभ्यन्तरे श्वेतकमलमध्ये सहस्र-दलमण्डलरूपकमले अकथादित्रिरेखानिर्मितं हंसःवर्णयुक्तत्रिकोणे च विधेयम् ॥ ५७,५८ ॥

सकलभुवनसृष्टिः कल्पिताशेषपुष्टिर् -
निखिलनिगमदृष्टिः सम्पदां व्यर्थदृष्टिः ।
अवगुणपरिमार्ष्टिस्तत्पदार्थैकदृष्टिर् -
भवगुणपरमेष्ठिर्मोक्षमार्गैकदृष्टिः ॥ ५९ ॥
सकलभुवनरंगस्थापनास्तम्भयष्टिः -
सकरुणरसवृष्टिस्तत्त्वमालासमष्टिः ।
सकलसमयसृष्टिः सच्चिदानन्ददृष्टिः -
निवसतु मयि नित्यं श्रीगुरोर्दिव्यदृष्टिः ॥ ६० ॥

अर्थ निखिलजगत्सृष्टिकारिणी, सर्वपदार्थ-पुष्टिविधायिनी, सकलशास्त्रावगाहिनी, संपदां व्यर्थताप्रतिपादिनी, अवगुणपरिमार्जनकारिणी, तत्-सत्तायाम् एकदृष्टिविधायिनी, संसारस्य गुणानां विधायिका, मोक्षमार्गविलोकिनी

सकलभुवनरंगमञ्चस्थापनायै आधारस्तम्भभूता करुणारसवर्षिणी, षट्त्रिंशत्तत्वानां समष्टिरूपमाला समाना, यया सर्वे नियमाः कालादयो वा रच्यन्ते, या सच्चिदानन्दरूपा, सा श्रीगुरोः कृपादृष्टि मयि नित्यं वर्तताम् ॥ ५९,६० ॥

अग्निशुद्धसमंतात ज्वालापरिचकाधिया ।
मंत्रराजमिमं मन्येऽहर्निशं पातु मृत्युतः ॥ ६१ ॥

अर्थ हे देवि, अग्निशुद्धसुवर्णवत् बुद्धिज्वालाविशुध्धः अयं मन्त्रराजः निरन्तरं मृत्योः रक्षतु, इत्यहं भावयामि ॥ ६१ ॥

तदेजति तन्नैजति तद्दूरे तत्समीपके ।
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः ॥ ६२ ॥

अर्थ तत्चलितमस्ति, तत् स्थिरमपि अस्ति । तत् दूरे तत् च अन्तिके वर्तते । सर्वस्य मध्ये तदस्ति, तथा च सर्वस्य बहिरपि अस्ति ॥ ६२ ॥

अजोऽहमजरोऽहं च अनादिनिधनः स्वयम् ।
अविकारश्चिदानन्द अणीयान्महतो महान् ॥ ६३ ॥

अर्थ 'अहं' शब्देन वर्णितोऽयम् अजः, अमरः अजरः अनादिः मृत्युरहित श्चास्ति, निर्विकारः चिदानन्दः अणो सूक्ष्मः महतो महांश्चास्ति ॥ ६३ ॥

अपूर्वाणां परं नित्यं स्वयं ज्योतिर्निरामयम् ।
विरजं परमाकाशं ध्रुवमानन्दमव्ययम् ॥ ६४ ॥

अर्थ इदं तत्त्वम् अपूर्वं ज्ञेयम्, यत् नित्यं स्वयं प्रकाशितं निरामयं मलरहितं परमाकाशस्वरूपम् अविचलम् आनन्दस्वरूपं क्षयरहितं चास्ति ॥ ६४ ॥

श्रुतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् ।
यस्य चात्मतपो वेद देशिकं च सदा स्मरेत् ॥६५॥
मननं यद्भवं कार्यं तद्वदामि महामते ।
साधुत्वं च मया दृष्ट्वा त्वयि तिष्ठति सांप्रतम् ॥ ६६ ॥

अर्थ यस्त गुरुदेवस्य आत्मतपोबलं वेदशास्त्रं प्रत्यक्षेतिहासानुमानैः चतुर्भिः प्रमाणैः ज्ञायते, तस्य गुरुदेवस्य स्मरणं कार्यम् । हे देवि, त्वयि साधुतां दृष्ट्वा तस्य तत्त्वस्य मननं कथं कार्यं तदहं त्वां वदामि ॥ ६५,६६ ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ६७ ॥

अर्थ येन इदं संपूर्णं वलयाकारं चराचरं जगद् व्याप्तं, तस्य (ब्रह्मणःआत्मतत्त्वस्य वा) पदं येन दर्शितं, तस्मै श्रीगुरुवे नमः ॥ ६७ ॥

सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः ॥ ६८ ॥

अर्थ यस्य चरणकमलं सर्वेषां वेदानां मुकुटमणिरूपैः महावाक्यैः सुशोभितमस्ति, यश्च वेदान्तरूपकमलंविकासाय सूर्यसदृशः तस्मै श्रीगुरुदेवाय नमः ॥ ६८ ॥

यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम् ।
य एव सर्वसंप्राप्तिस्तस्मै श्रीगुरवे नमः ॥ ६९ ॥

अर्थ यस्य स्मरणमात्रेणैव ज्ञानं स्वयम् उत्पद्यते, यश्च स्वयं सर्वसंप्राप्तिरूपः तस्मै श्रीगुरुवे नमः ॥ ६९ ॥

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥ ७० ॥

अर्थ यः गुरुः चैतन्यरूपः शाश्वतः शान्तः आकाशातीतः निरञ्जन नादातीतः बिन्द्वतीत कलातीतश्च, तस्मै श्रीगुरवे नमः ॥ ७० ॥

स्थावरं जंगमं चैव तथा चैव चराचरम् ।
व्याप्तं येन जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ ७१ ॥

अर्थ स्थावर-जंगम-चराचरात्मकं सर्वं जगत् येन व्याप्तं, तस्मै श्रीगुरवे नमः ॥ ७१ ॥

ज्ञानशक्तिसमारूढस्तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाताय तस्मै श्रीगुरवे नमः ॥ ७२ ॥

अर्थ ज्ञानशक्तिसमारूढाय षट्त्रिंशत्तत्त्वमाला-विभूषिताय भुक्तिमुक्तिप्रदायकाय तस्मै श्रीगुरवे नमः ॥ ७२ ॥

अनेकजन्मसंप्राप्त-सर्वकर्मविदाहिने ।
स्वात्मज्ञानप्रभावेण तस्मै श्रीगुरवे नमः ॥ ७३ ॥

अर्थ स्वस्य आत्मज्ञानप्रभावेण यः अनेकजन्मसञ्चितानि सर्वाणि कर्माणि भस्मीकरोति तस्मै श्रीगुरवे नमः ॥ ७३ ॥

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः
तत्त्वम् ज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥ ७४ ॥

अर्थ श्रीगुरोः अधिकं किमपि तत्त्वं नास्ति, गुरुसेवायाः परंतपः नास्ति, ज्ञानात् अधिकं किमपि तत्त्वं नास्ति, तस्मै श्रीगुरुदेवाय नमः ॥ ७४ ॥

मन्नाथः श्रीजगन्नाथो मद्गुरुश्श्रीजगद्गुरुः ।
ममात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ ७५ ॥

अर्थ मम नाथः जगतः नाथः, मम गुरुः श्रीजगदगुरुः । मम आत्मा सर्वव्यापी सर्वावस्थानकारी च, एवम् अनुभावयते तस्मै श्रीगुरवे नमः ॥ ७५ ॥

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
मंत्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥ ७६ ॥

अर्थ श्रीगुरोः मूर्तिः ध्यानस्य मूलम्, श्रीगुरोः पदं पूजायाः मूलम्,श्रीगुरुर्वाक्यं मन्त्रस्य मूलम्, मोक्षस्य मूलं च भवति श्रीगुरुकृपा ॥ ७६ ॥

गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥ ७७ ॥

अर्थ गुरुः आदिर्भवति, गुरुरनादिर्भवति, गुरोः परं किमपि नास्ति, तस्मै श्रीगुरुदेवाय नमः ॥ ७७ ॥

सप्तसागरपर्यन्त-तीर्थस्नानादिकं फलम् ।
गुरोरङ्घ्रिपयोबिन्दु-सहस्त्रांशेन दुर्लभम् ॥ ७८ ॥

अर्थ सप्तसु सागरेषु तीर्थस्नानेन यत्फलं लभ्यते, गुरोः पादोदकबिन्दुसहस्त्रांशेऽपि तत् फलं प्राप्यते ॥ ७८ ॥

हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात्सर्वप्रयत्नेन श्रीगुरुं शरणं व्रजेत् ॥ ७९ ॥

अर्थ हरिकोपात् त्रातुं गुरुः समर्थः, परंतु गुरुकोपात् रक्षितुं कोऽपि प्रभवति। ततः प्रयत्नपूर्वकं श्रीगुरुं शरणं गच्छेत् ॥ ७९ ॥

गुरुरेव जगत्सर्वं ब्रह्मविष्णुशिवात्मकम् ।
गुरोः परतरं नास्ति तस्मात्संपूजयेद् गुरुम् ॥ ८० ॥

अर्थ ब्रह्मविष्णुशिवस्वरूपमिदं सर्वं जगत् श्रीगुरुरेव । गुरोः अधिकं किमपि नास्ति । तस्मात् गुरुं समर्चयेत् ॥ ८० ॥

ज्ञानं विज्ञानसहितं लभ्यते गुरुभक्तितः ।
गुरोः परतरं नास्ति ध्येयोऽसौ गुरुमार्गिभिः ॥ ८१ ॥

अर्थ गुरुभक्तिबलेन ज्ञानं विज्ञानं (आत्मनः अपरोक्षं ज्ञानं तथा जगतः परोक्षं ज्ञानं) च प्राप्यते । गुरोः श्रेष्ठं किमपि नास्ति, अतः सिद्धमार्गिभिः तस्य ध्यानं विधेयम् ॥ ८१ ॥

यस्मात्परतरं नास्ति नेति नेतीति वै श्रुतिः।
मनसा वचसा चैव नित्यमाराधयेद् गुरुम् ॥ ८२ ॥

Acc. 23645

अर्थ नेति नेतीत्युक्त्वा श्रुत्या कथितं यत् गुरोरधिकं किञ्चित् वस्तु नास्ति । अतः चित्तेन वचनेन च निरन्तरं गुरोः आराधना कर्त्तव्या ॥ ८२ ॥

गुरोः कृपाप्रसादेन ब्रह्मविष्णुसदाशिवाः ।
समर्थाः प्रभवादौ च केवलं गुरुसेवया ॥ ८३ ॥

अर्थ ब्रह्मविष्णुशिवाः केवलं गुरुसेवया ततप्रसादेन च संसारस्य उत्पत्त्यादि कर्मसु समर्थाः भवन्ति ॥ ८३ ॥

देवकिन्नरगन्धर्वाःपितरो यक्षचारणाः ।
मुनयोपि न जानन्ति गुरुशुश्रूषणे विधिम् ॥ ८४ ॥

अर्थ देव-किन्नर-गन्धर्व-पितृ-यक्षचारणाः मुनयश्चापि गुरुसेवा--विधिं न जानन्ति ॥ ८४ ॥

महाहंकारगर्वेण तपोविद्याबलान्विताः ।
संसारकुहरावर्ते घटयंत्रे यथा घटाः ॥ ८५ ॥

अर्थ तपोविद्याबलन्विताः अहंकारिणः जनाः अस्मिन् संसारभ्रमचक्रे तथा भ्रमन्ति, यथा घटयंत्रचक्रे घटाः ॥ ८५ ॥

न मुक्ता देवगंधर्वाः पितरो यक्षकिन्नराः ।
ऋषयः सर्वसिद्धाश्च गुरुसेवापराङ्मुखाः ॥ ८६ ॥

अर्थ देवगन्धर्व पितृयक्षकिन्नरसिद्धाः ऋषयश्चापि गुरुसेवा पराङ्मुखाः कदापि मुक्तिं न लभन्ते ॥ ८६ ॥

ध्यानं शृणु महादेवि सर्वानन्दप्रदायकम् ।
सर्वसौख्यकरं नित्यं भुक्तिमुक्तिविधायकम् ॥ ८७ ॥

अर्थ हे महादेवि शृणु, गुरुध्यानं सर्वानन्दप्रदं सर्वसुखप्रदं भोग-मोक्षप्रदायकं चास्ति ॥ ८७ ॥

श्रीमत्परब्रह्म गुरुं स्मरामि श्रीमत्परब्रह्म गुरुं वदामि ।
श्रीमत्परब्रह्म गुरुं नमामि श्रीमत्परब्रह्म गुरुं भजामि ॥८८॥

अर्थ अहं श्रीमत्परब्रह्मगुरोः स्मरणं, स्तवनं, नमनं, वाचा, मनसा, कर्मणा च सेवाराधनं करोमि ॥ ८८ ॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्ति
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादि लक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ ८९ ॥

अर्थ ब्रह्मानन्दरूपं, परमसुखदातारं, केवल-ज्ञानस्वरूपं, सुखदुःखादिद्वन्द्वरहितं आकाश-समानं,तत्त्वमस्यादिवाक्यानां लक्ष्यं, एकं, नित्यं, विमलं, निश्चलं सर्वप्राणिनां मतेः साक्षिणं, भावातीतं, त्रिभ्यः गुणेभ्यः रहितं, तं सद्गुरुम् अहं नमस्करोमि ॥८९॥

नित्यं शुद्धं निराभासं निराकारं निरञ्जनम् ।
नित्यबोधं चिदानन्दं गुरुं ब्रह्म नमाम्यहम् ॥ ९० ॥

अर्थ नित्यं, शुद्धम्, आभासरहितं, निराकारं, निरञ्जनं, नित्यबोधस्वरूपं चिदानन्दस्वरूपं परब्रह्म गुरुदेवम् अहं नमस्करोमि ॥ ९० ॥

हृदंबुजे कर्णिकमध्यसंस्थे सिंहासने संस्थितदिव्यमूर्तिम् ।
ध्यायेद्गुरुं चन्द्रकलाप्रकाशं चित्पुस्तकाभीष्टवरं दधानम् ॥ ९१॥

अर्थ हृदयकमले कर्णिकामध्यस्थसिंहासने विराजमानस्य दिव्यमूर्त्तेः, चन्द्रकलासमप्रकाशरूपस्य, एकेनहस्तेन ज्ञानपुस्तकम् अपरहस्तेन च इष्टवरदानवरमुद्रां दधतः श्रीगुरोर्ध्यानं विधेयम् ॥ ९१ ॥

श्वेताम्बरं श्वेतविलेपपुष्पं मुक्ताविभूषं मुदितं द्विनेत्रम् ।
वामाङ्कपीठस्थितदिव्यशक्तिं मन्दस्मितं सान्द्रकृपानिधानम् ॥ ९२ ॥

अर्थ श्वेताम्बरं, श्वेतविलेपनं, श्वेतपुष्पाणि च दधानं, मुक्तामालालंकृतम्, आनन्दपूर्णं, नेत्रद्वययुक्तं, वामांकपीठधृतदिव्यशक्तिं, स्मितहासयुतं, कृपाकरं, गुरुदेवं ध्यायेत् ॥ ९२ ॥

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुंनित्यमहं नमामि ॥ ९३ ॥

अर्थ आनन्दस्वरूपम्, आनन्दप्रदातारं, प्रसन्नमुखं, ज्ञानस्वरूपम्, आत्मबोधयुक्तं, योगीश्वरं स्तुत्यं, संसाररूपस्य रोगस्य, वैद्यं श्रीगुरुमहं नित्यं नमामि ॥ ९३ ॥

यस्मिन् सृष्टिस्थितिध्वंसनिग्रहानुग्रहात्मकम् ।
कृत्यं पञ्चविधं शश्वद्भासते तं नमाम्यहम् ॥ ९४ ॥

अर्थ यस्मिन् उत्पत्ति-स्थिति-ध्वंस-निग्रह-अनुग्रहात्मकं पञ्चकृत्यं नित्यं भासते, तं गुरुमहं नमस्करोमि ॥ ९४ ॥

प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम् ।
वराभययुतं शान्तं स्मरेत्तं नामपूर्वकम् ॥ ९५ ॥

अर्थ प्रभाते, शिरसि श्वेतकमले विराजमानस्य, द्विनेत्रस्य, द्विभुजस्य वराभयमुंद्रायुक्तस्य, शान्तस्य श्रीगुरोः ध्यानं नामपूर्वकं विधेयम् ॥ ९५ ॥

न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम् ।
शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः ॥ ९६ ॥

अर्थ गुरोः अधिकं किञ्चित् नास्ति, गुरोः अधिकं किञ्चित् नास्ति, गुरोः अधिकं किञ्चित् नास्ति, गुरोः अधिकं किञ्चित् नास्ति, इदं शिवशासनं, इदं शिवशासनम्, इदं शिवशासनम्, इदं शिवशासनम् ॥ ९६ ॥

इदमेव शिवं त्विदमेव शिवं -
त्विदमेव शिवं त्विदमेव शिवम् ।
मम शासनतो मम शासनतो -
मम शासनतो मम शासनतः ॥ ९७ ॥

अर्थ इदं गुरुतत्त्वं कल्याणकरम्, इदं कल्याणकरम्, इदं कल्याणकरम्, इदं कल्याणकरम्, इदं मम शासनं, मम शासनं, मम शासनम् मम शासनम् ॥ ९७ ॥

एवंविधं गुरुं ध्यात्वा ज्ञानमुत्पद्यते स्वयम् ।
तत्सद्गुरुप्रसादेन मुक्तोऽहमिति भावयेत् ॥ ९८ ॥

अर्थ एवं प्रकारेण (श्लोक ८८ तः ९५ पर्य्यन्तवर्णनानुसारेण) गुरुध्यानेन ज्ञानं स्वतः समुत्पद्यते, तस्य सद्गुरोः प्रसादेन 'अहं मुक्त' इति चिन्तयेत् ॥ ९८ ॥

गुरुदर्शितमार्गेण मनःशुद्धिं तु कारयेत् ।
अनित्यं खण्डयेत् सर्वं यत्किञ्चिदात्मगोचरम् ॥९९॥

अर्थ गुरुप्रदर्शितमार्गेण मनसः शोधनं करणीयम्, मनसः इन्द्रियाणां च विषयभूतान् सर्वान् अनित्यपदार्थान् त्यजेत् ॥ ९९ ॥

ज्ञेयं सर्वस्वरूपं च ज्ञानं च मन उच्यते ।
ज्ञानं ज्ञेयसमं कुर्यात् नान्यः पन्था द्वितीयकः ॥ १०० ॥

अर्थ *सर्वे आत्मस्वरूपं जानीयुः, मनः एव ज्ञानमित्युच्यते* (यतः मनसा एव ज्ञानं भवति), 'ज्ञानम्' अर्थात् मनः ज्ञेयसमम् अर्थात् आत्मतुल्यं कुर्यात्, मोक्षप्राप्तये अन्यः मार्गःनास्ति ॥ १०० ॥

एवं श्रुत्वा महादेवि गुरुनिन्दां करोति यः ।
स याति नरकं घोरं यावद् चन्द्रदिवाकरौ ॥ १०१ ॥

अर्थ हे महादेवि गुरोः ईदृशं महत्त्वं श्रुत्वा अपि यः गुरुं निन्दति, स चन्द्रसूर्ययोःअवस्थितिं यावत् घोरं नरकं गच्छति ॥ १०१॥

यावत्कल्पांतको देहस्तावदेव गुरुं स्मरेत् ।
गुरुलोपो न कर्तव्यः स्वच्छन्दो यदि वा भवेत् ॥१०२॥

अर्थ हे देवि, यावत् शरीरं तिष्ठति, कल्पान्तं तावदपि गुरुस्मरणं कार्यम्, शिष्यः स्वच्छन्दोऽपि (मुक्तऽःअपि) गुरुपराङ्मुखः न भवेत् ॥ १०२ ॥

हुंकारेण न वक्तव्यं प्राज्ञैः शिष्यैः कथञ्चन ।
गुरोरग्रे न वक्तव्यम् असत्यं च कदाचन ॥ १०३ ॥

अर्थ विवेकी शिष्यः कदापि गुरोः समीपे हुंकारपूर्वकं न किञ्चित् कथयेत्, गुरोः अग्रेऽपि असत्यभाषणं न कुर्यात् ॥ १०३ ॥

गुरुं त्वंकृत्य हुंकृत्य गुरुं निर्जित्य वादतः ।
अरण्ये निर्जले देशे स भवेद् ब्रह्मराक्षसः ॥ १०४ ॥

अर्थ यः शिष्यः गुरुं हुंकारेण त्वंकारेण वा कथयति, वादेन गुरुं जेतुं प्रयन्तते च, स जलहीने वने ब्रह्मराक्षसः भवति ॥ १०४ ॥

मुनिभिः पन्नगैर्वाऽपि सुरैर्वा शापितो यदि ।
कालमृत्युभयाद्वापि गुरु रक्षति पार्वति ॥ १०५ ॥

अर्थ हे पार्वति, मुनि-सर्प-देवानां शापात् कालभयात् मृत्युभयाच्च केवलं गुरुरेव त्रातुं शक्नोति ॥ १०५ ॥

अशक्ता हि सुराद्याश्च अशक्ता मुनयस्तथा ।
गुरुशापेन ते शीघ्रं क्षयं यान्ति न संशयः ॥ १०६ ॥

अर्थ ये गुरुणा शप्ताः, तद्रक्षणाय देवाः मुनयश्च असमर्थाः भवन्ति, ते शीघ्रं नश्यन्तिइति न संशयम् ॥ १०६ ॥

मंत्रराजमिदं देवि गुरुरित्यक्षरद्वयम् ।
स्मृतिवेदार्थवाक्येन गुरुः साक्षात्परं पदम् ॥ १०७ ॥

अर्थ हे देवि, 'गुरुः' इति अक्षरद्वयनिर्मितः शब्दः महामन्त्रः भवति, गुरुः साक्षात्परब्रह्मेति श्रुतिस्मृती घोषयतः ॥ १०७ ॥

श्रुतिस्मृती अविज्ञाय केवलं गुरुसेवकाः ।
ते वै संन्यासिनः प्रोक्ता इतरे वेषधारिणः ॥ १०८ ॥

अर्थ श्रुतिं स्मृतिं च अजानन्तः अपि केवलं गुरु-सेवानिरताः एव संन्यासिनः भवन्ति । अपरे केवलं वेशधारिणः संन्यासिनः भवन्ति ॥ १०८ ॥

नित्यं ब्रह्म निराकारं निर्गुणं बोधयेत् परम् ।
सर्वं ब्रह्म निराभासं दीपो दीपान्तरं यथा ॥ १०९ ॥

अर्थ यथा एकः प्रदीपः अपरं प्रदीपं प्रकाशयती, तथा शिष्यं यः नित्यं निराकारं निर्गुणं निराभासं परब्रह्म बोधयति, स गुरुःअस्ति ॥ १०९ ॥

गुरोः कृपाप्रसादेन आत्मारामं निरीक्षयेत् ।
अनेन गुरुमार्गेण स्वात्मज्ञानं प्रवर्त्तते ॥ ११० ॥

अर्थ श्रीगुरोः कृपाप्रसादं प्राप्य शिष्यः आत्मविषयं चिन्तयेत्, अनेन गुरुमार्गेण आत्मस्वरूपस्य ज्ञानं जायते ॥ ११० ॥

आब्रह्मस्तंबपर्यन्तं परमात्मस्वरूपकम् ।
स्थावरं जंगमं चैव प्रणमामि जगन्मयम् ॥ १११ ॥

अर्थ ब्रह्मणः आरभ्य स्तम्ब(तृण) पर्यन्तं स्थावरं जंगमं च परमात्मनः एव स्वरूपम् ईदृशं जगन्मयं गुरुदेवमहं प्रणमामि ॥ १११ ॥

वन्देऽहं सच्चिदानन्दं भेदातीतं सदा गुरुम् ।
नित्यं पूर्णं निराकारं निर्गुणं स्वात्मसंस्थितम् ॥ ११२ ॥

अर्थ सच्चिदानन्दस्वरूपं भेदरहितं नित्यं, पूर्णं, निराकारं, निर्गुणं, स्वात्मनि अवस्थितं, श्रीगुरुदेवमहं नमस्करोमि ॥ ११२ ॥

परात्परतरं ध्येयं नित्यम् आनन्दकारकम् ।
हृदयाकाशमध्यस्थं शुद्धस्फटिकसन्निभम् ॥ ११३ ॥

स्फटिकप्रतिमारूपं दृश्यते दर्पणे यथा ।
तथात्मनि चिदाकारं आनन्दं सोऽहमित्युत ॥ ११४ ॥

अर्थ नित्यं परात्परतरम् आनन्दकारकं हृदयगगनमध्यस्थं शुद्धस्फटिकवत् निर्मलं गुरुदेवं (परमात्मानं) ध्यायेत् । दर्पणे यथा शुद्धस्फटिकस्य प्रतिमा दृश्यते तथा आत्मनि चिदाकारः आनन्दरुपः "सोऽहम्" इति भावः प्रकटीभवति ॥ ११३,११४ ॥

अंगुष्ठमात्रपुरुषं ध्यायतश्चिन्मयं हृदि ।
तत्र स्फुरति भावो यः शृणु तं कथयाम्यहम् ॥ ११५ ॥

अर्थ हृदये अंगुष्ठमात्रस्य चिन्मयस्य आत्मनः ध्यानेन यः भावः स्फुरति तमहं कथयामि, शृणु ॥ ११५ ॥

अगोचरं तथाऽगम्यं नामरूपविवर्जितम् ।
निःशब्दं तद्विजानीयात् स्वभावं ब्रह्म पार्वति ॥११६॥

अर्थ हे पार्वति, ब्रह्मणः निजस्वरूपम् अगोचरम् अगम्यं नामरूपरहितं निःशब्दं (शब्दरहितं) च भवतीति जानीयात् ॥ ११६ ॥

यथा गन्धः स्वभावेन कर्पूरकुसुमादिषु ।
शीतोष्णादिस्वभावेन तथा ब्रह्म च शाश्वतम् ॥ ११७ ॥

अर्थ यथा कपूरे कुसुमादिषु च सुगन्धः स्वाभाविकः भवति, यथा शीतः उष्णश्च स्वाभाविकः, तथा ब्रह्म शाश्वतमस्ति ॥ ११७ ॥

स्वयं तथाविधो भूत्वा स्थातव्यं यत्रकुत्रचित् ।
कीटभ्रमरवत्तत्र ध्यानं भवति तादृशम् ॥ ११८ ॥

अर्थ एवं स्वयं ब्रह्मरूपेण यत्रकुत्रापि तिष्ठेत्, कीटो यथा भ्रमरस्य ध्यानेन भ्रमर एव भवति, तथा जीवात्मा ब्रह्मणः ध्यानेन ब्रह्मैव भवति ॥ ११८ ॥

गुरुध्यानं तथा कृत्वा स्वयं ब्रह्ममयो भवेत् ।
पिण्डे पदे तथा रूपे मुक्तोऽसौ नात्र संशयः ॥११९॥

अर्थ शिष्यः स्वचित्ते एवं गुरोर्ध्यानेन स्वयं ब्रह्ममयः भवेत्, पिण्ड-पद-रूपेषु चायं मुक्तः भवतीत्यत्र न कश्चित् संशयः ॥११९॥

श्रीपार्वत्युवाच

पिण्डं किं नु महादेव पदं किं समुदाहृतम् ।
रूपातीतं च रूपं किम् एतद् आख्याहि शंकर ॥ १२०॥

अर्थ हे महादेव ! पिण्डं किम् ? किं पदमित्युच्यते ? हे शंकर, रूपं किं, रूपातीतं च किम् ? एतत् वितत्य वद ॥ १२०॥

श्री महादेव उवाच

पिण्डं कुण्डलिनीशक्तिः पदं हंसमुदाहृतम् ।
रूपं बिन्दुरिति ज्ञेयं रूपातीतं निरञ्जनम् ॥ १२१ ॥

अर्थ हे देवि ! कुण्डलिनिशक्तिः पिण्डमिति, हंसं पदमिति बिन्दुं रूपमिति च वदन्ति, तथा निरञ्जनम् निराकारं रूपातीतमिति कथयन्ति ॥ १२१ ॥

पिण्डे मुक्ताः पदे मुक्ता रूपे मुक्ता वरानने ।
रूपातीते तु ये मुक्तास्ते मुक्ता नात्र संशयः ॥ १२२ ॥

अर्थ हे सुमुखि, यस्य कुण्डलिनी शक्तिः जागृता स पिण्डे मुक्तः, यस्य हंसे प्राणाः स्थिराः स पदे मुक्तः, अपि च यस्य आत्मज्योतिरूपस्य नीलबिन्दोः दर्शनं जातं स रूपे मुक्तः, यः निरञ्जन-निराकार-निर्विकल्पस्थितौ वर्त्तते स यथार्थतः मुक्तः, अत्र न संशयः ॥ १२२ ॥

स्वयं सर्वमयो भूत्वा परं तत्त्वं विलोकयेत् ।
परात्परतरं नान्यत् सर्वमेतन्निरालयम् ॥ १२३ ॥

अर्थं साधकः स्वयं सर्वमयो भूत्वा इदं परमं तत्त्वं पश्येत्, अस्मात् परमतत्त्वात् परं किमपि नास्ति, एतत् सर्वं निराश्रयं भवति ॥१२३॥

तस्यावलोकनं प्राप्य सर्वसंगविवर्जितः ।
एकाकी निःस्पृहः शान्तः तिष्ठासेत् तत्प्रसादतः॥ १२४॥

अर्थ अस्य परमतत्त्वस्य साक्षात्कारानन्तरं साधकः श्रीगुरोः कृपया सर्वासक्तिरहितः एकाकी निःस्पृहः शान्तः सन् स्थिरो भवति ॥ १२४ ॥

लब्धं वाऽथ न लब्धं वा स्वल्पं वा बहुलं तथा ।
निष्कामेनैव भोक्तव्यं सदा संतुष्टचेतसा ॥ १२५ ॥

अर्थ इष्टप्राप्तिः भवतु न भवतु वा, स्वल्पं भवतु अधिकं वा भवतु, सदा कामनारहितः सन् सन्तुष्टचित्तेन तत् भोक्तव्यम् ॥१२५॥

सर्वज्ञपदमित्याहुर्देही सर्वमयो बुधाः ।
सदानन्दः सदा शान्तो रमते यत्रकुत्रचित् ॥ १२६ ॥

अर्थ ज्ञानिनः तत् पदं सर्वज्ञपदमिति कथयन्ति, यत् पदं लब्ध्वा देही जीवः सर्वात्ममयो भवति, सदा शान्तः सदानन्दश्च सन् यत्र कुत्रचित् रमते ॥ १२६ ॥

यत्रैव तिष्ठते सोऽपि स देशः पुण्यभाजनम् ।
मुक्तस्य लक्षणं देवि तवाग्रे कथितं मया ॥ १२७ ॥

अर्थ स यत्र निवसति, स देशः पुण्यभूमिः भवति, हे देवि, मया तवाग्रे मुक्तपुरुषस्य लक्षणं वर्णितम् ॥ १२७ ॥

उपदेशः तथा देवि गुरुमार्गेण मुक्तिदः ।
गुरुभक्तिस्तथा ध्यानं सकलं तव कीर्तितम् ॥ १२८ ॥

अर्थ हे देवि, गुरुमार्गेण मुक्तिप्रदायकः उपदेशः, गुरुभक्तिः, ध्यानं च एतत् सर्वं मया, तवाग्रे कथितम् ॥ १२८ ॥

अनेन यद् भवेत् कार्यं तद्वदामि महामते ।
लोकोपकारकं देवि लौकिकं तु न भावयेत् ॥ १२९ ॥

अर्थ हे महाबुद्धिशालिनि, एतेन (उपदेश-गुरुभक्ति-ध्यानवलेन) यत् कार्यं सिद्ध्यति तदहं कथयामि, अस्य उपयोगः लोककल्याणाय विधेयः, न तु लौकिककार्याय ॥ १२९ ॥

लौकिकात्कर्मणो यान्ति ज्ञानहीना भवार्णवम् ।
ज्ञानी तु भावयेत्सर्वं कर्म निष्कर्म यत्कृतम् ॥ १३० ॥

अर्थ ये ज्ञानहीनाः जनाः लौकिककार्याय अस्य उपयोग कुर्वन्ति, ते संसारसमुद्रे निपतन्ति, परंतु ज्ञानिनां कृतं सर्वं कर्म निष्कर्म भवति, (ते कर्मफलं न भुञ्जन्ते) ॥ १३० ॥

इदं तु भक्तिभावेन पठते शृणुते यदि ।
लिखित्वा तत्प्रदातव्यं तत्सर्वं सफलं भवेत् ॥ १३१ ॥

अर्थ अस्याः गुरुगीताः भक्तिभावपूर्वकं पठनं, श्रवणं लिखित्वा प्रदानं च सर्वं सफलं भवति ॥ १३१ ॥

गुरुगीतात्मकं देवि शुद्धतत्त्वं मयोदितम् ।
भवव्याधिविनाशार्थम् स्वयमेव जपेत्सदा ॥ १३२ ॥

अर्थ हे देवि ! गुरुगीतारूपं शुद्धं तत्त्वं मया त्वदग्रे कथितम्, भवव्याधिविनाशाय सर्वदा स्वयम् इदं जपेत् ॥ १३२ ॥

गुरुगीताक्षरैकं तु मंत्रराजमिमं जपेत् ।
अन्ये च विविधा मंत्राः कलां नार्हन्ति षोडशीम् ॥१३३॥

अर्थ अस्याः गुरुगीतायाः एकैकमक्षरमपि परमः मन्त्रः, अपरे मन्त्राः अस्याः षोडश्यां कलायाः तुल्याः अपि न भवन्ति ॥१३३॥

अनन्तफलमाप्नोति गुरुगीताजपेन तु ।
सर्वपापप्रशमनम् सर्वदारिद्र्यनाशनम् ॥ १३४ ॥

अर्थ गुरुगीतापाठेन अनन्तफललाभः भवति, तेन सर्वं पापं नश्यति सर्वा दरिद्रता नश्यति च ॥ १३४ ॥

कालमृत्युभयहरं सर्वसंकटनाशनम् ।
यक्षराक्षसभूतानां चोरव्याघ्रभयापहम् ॥ १३५ ॥

अर्थ गुरुगीताजपः कालमृल्युभय दुरकरी सर्वसंकटनाशकः यक्ष-राक्षस-भूत-चोर-व्याघ्रादिभयहरणकारी चास्ति ॥ १३५ ॥

महाव्याधिहरं सर्वं विभूतिसिद्धिदं भवेत् ।
अथवा मोहनं वश्यं स्वयमेव जपेत्सदा ॥ १३६ ॥

अर्थ एतज्जपेन महाव्याधयः दूरीभवन्ति, सर्वाः सिद्धयः अलौकिक्यः शक्तयः सम्मोहनवशीकरणादयश्च प्राप्यन्ते, इमां गीतां स्वयं जपेत् ॥ १३६ ॥

वस्त्रासने च दारिद्र्यं पाषाणे रोगसंभवः ।
मेदिन्यां दुःखमाप्नोति काष्ठे भवति निष्फलम् ॥१३७॥

अर्थ वस्त्रासनोपरि उपविश्य जपविधानेन दरिद्रतां, प्रस्तरोपरि उपविश्य जपसाधनेन रोगोत्पत्ति., पृथिव्याः उपरि उपवेशनं कृत्वा जयविधानेन

दुःखप्राप्तिश्च भवति, काष्ठासनोपरि उपविश्य जपविधानेन जपः निष्फलः भवति ॥ १३७ ॥

कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ।
कुशासने ज्ञानसिद्धिः सर्वसिद्धिस्तु कम्बले ॥ १३८ ॥

अर्थ कृष्णमृगचर्मणि उपविश्य जपसाधनेन ज्ञानप्राप्तिः, व्याघ्रचर्मोपरि मोक्षप्राप्तिः दर्भासनोपरि ज्ञानसिद्धिः, कम्बलोपरि सर्वसिद्धिश्च जायते ॥ १३८ ॥

कुशैर्वा दूर्वया देवि आसने शुभ्रकम्बले ।
उपविश्य ततो देवि जपेदेकाग्रमानसः ॥ १३९ ॥

अर्थ हे देवि, अस्याः गुरुगीतायाः स्वाध्यायः दर्भासने, दूर्वासने शुभ्रकम्बलासने वा उपविश्य कर्त्तव्यः ॥ १३९ ॥

ध्येयं शुक्लं च शान्त्यर्थं वश्ये रक्तासनं प्रिये ।
अभिचारे कृष्णवर्णं पीतवर्णं धनागमे ॥ १४० ॥

अर्थ शान्तिप्राप्तये शुक्लासनं, वशीकरणाय रक्तासनं, सम्मोहनाय कृष्णासनं, धनप्राप्तये पीतासनं च उपयुक्तमस्ति ॥ १४० ॥

उत्तरे शान्तिकामस्तु वश्ये पूर्वमुखो जपेत् ।
दक्षिणे मारणं प्रोक्तं पश्चिमे च धनागमः ॥ १४१ ॥

अर्थ शान्तिलाभाय उत्तरमुखः, वशीकरणाय पूर्वमुखः, मारणाय दक्षिणमुखः, धनप्राप्तये पश्चिममुखश्च सन् जपं कुर्यात् ॥ १४१ ॥

मोहनं सर्वभूतानां बंधमोक्षकरं भवेत् ।
देवराजप्रियकरं सर्वलोकवशं भवेत् ॥ १४२ ॥

अर्थ अस्यां गुरुगीतायाः पाठेन सर्वेषां प्राणिनां सम्मोहनं, सर्वबन्धनमुक्ति : देवानां राज्ञां च प्रीतीः, सर्वलोकवशीकरणं च भवति ॥१४२॥

सर्वेषां स्तम्भनकरं गुणानां च विवर्धनम् ।
दुष्कर्मनाशनं चैव सुकर्मसिद्धिदं भवेत् ॥ १४३ ॥

अर्थ अस्यां गुरुगीताः पाठेन सर्वेषाम् अनिष्टानां स्तम्भनं, गुणानां वर्धनं, दुष्कर्मणां नाशनं सुकर्मसिद्धिश्च जायते ॥ १४३ ॥

असिद्धं साधयेत्कार्यं नवग्रहभयापहम् ।
दुःस्वप्ननाशनं चैव सुस्वप्नफलदायकम् ॥ १४४ ॥

अर्थ गुरुगीतापाठः असिद्धंकार्यं साधयति, नवग्रहाणां पीडाम् अपहरति, दुःस्वप्नं दूरीकरोति, सुस्वप्नं सफलयति च ॥ १४४ ॥

सर्वशान्तिकरं नित्यं तथा वंध्यासुपुत्रदम् ।
अवैधव्यकरं स्त्रीणां सौभाग्यदायकं सदा ॥ १४५ ॥

अर्थ गुरुगीतापाठः सर्वशान्तिकरः, वंध्या-स्त्रीणां सुपुत्रदायकः,नारीणाम् अवैधव्यकारः सौभाग्यदायकश्च. भवति ॥ १४५ ॥

आयुरारोग्य-ऐश्वर्यपुत्रपौत्रप्रवर्धनम् ।
अकामतः स्त्री विधवा जपान्मोक्षमवाप्नुयात् ॥ १४६ ॥

अर्थ एतत्पाठेन आयुरारोग्यैश्वर्यपुत्रपौत्राणां वृद्धिर्भवति, विधवा स्त्री यदि निष्कामभावेन एतत्पठति तदा सा मुक्तिं लभते ॥ १४६ ॥

अवैधव्यं सकामा तु लभते चान्यजन्मनि ।
सर्वदुःखभयं विघ्नं नाशयेच्छापहारकम् ॥ १४७ ॥

अर्थ सकामभावेन एतत्पाठात् परजन्मनि अवैधव्यं लभ्यते । गुरुगीतापाठः सर्वं, दुःखं, भयं, विघ्नं, शापं च नाशयति ॥ १४७ ॥

सर्वबाधाप्रशमनं धर्मार्थकाममोक्षदम् ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥ १४८ ॥

अर्थ एतत्पाठेन सर्वे विघ्नाः शाम्यन्ति धर्मार्थ-काममोक्षाः लभ्यन्ते च, साधकः यं यं विषयं चिन्तयति, तंसर्वमवश्यं प्राप्नोति ॥ १४८ ॥

कामितस्य कामधेनुः कल्पनाकल्पपादपः ।
चिन्तामणिः चिन्तितस्य सर्वमङ्गलकारकम् ॥ १४९ ॥

अर्थ अयं गुरुगीतापाठः सकामानां कामधेनुः, कल्पनावतां कल्पद्रुमः, चिन्तकानां चिन्तामणिस्वरूपश्चास्ति, स सर्वेषां मंगलं विदधाति ॥ १४९ ॥

मोक्षहेतुर्जपेत् नित्यं मोक्षश्रियमवाप्नुयात् ।
भोगकामो जपेद्यो वै तस्य कामफलप्रदम् ॥ १५० ॥

अर्थ मोक्षच्छया यः नित्यं गुरुगीतां जपति, स मोक्षलक्ष्मीं लभते, यः भोगकामनया जपति स इच्छानुरूपं फलं प्राप्नोति च ॥ १५० ॥

जपेत् शाक्तश्च सौरश्च गाणपत्यश्च वैष्णवः ।
शैवश्च सिद्धिदं देवि सत्यं सत्यं न संशयः ॥ १५१ ॥

अर्थ शक्ति-सूर्य-गणेश-विष्णु-शिवानाम् उपासकाः सिद्धिप्रदां गुरुगीतां जपेयुः, सत्यमंत्रः न कश्चिच् संशयः ॥ १५१ ॥

अथ काम्यजपे स्थानं कथयामि वरानने ।
सागरे वा सरित्तीरेऽथवा हरिहरालये ॥ १५२ ॥
शक्तिदेवालये गोष्ठे सर्वदेवालये शुभे
वटे च धात्रीमूले वा मठे वृंदावने तथा ॥ १५३ ॥
पवित्रे निर्मले स्थाने नित्यानुष्ठानतोऽपि वा ।
निवेदनेन मौनेन जपमेतं समाचरेत् ॥ १५४ ॥

अर्थ हे सुमुखि, काम्यफलप्राप्तये जपविधानस्थानानिं अहं कथयामि, समुद्रतीरे नदीतीरे वा, शिवमन्दिरे विष्णुमन्दिरे वा, शक्तिमन्दिरे, गोशालायां, सर्वेषु देवालयेषु, वटवृक्षस्य धात्रीवृक्षस्य वा मूले, मठे, तुलसीवने, पवित्र-निर्मलस्थाने च नित्यानुष्ठानतः शान्तभावेन मौनभावेन च गुरुगीतां जपेत् ॥ १५२,१५३,१५४ ॥

श्मशाने भयभूमौ तु वटमूलान्तिके तथा ।
सिद्ध्यन्ति धौत्तरे मूले चूतवृक्षस्य सन्निधौ ॥ १५५ ॥

अर्थ श्मशानभूमौ, भयस्थाने, वटवृक्षमूलसमीपे, धात्रीमूले, आम्रवृक्षस्य निकटे च जपविधानेन सिद्धिर्भवति ॥ १५५ ॥

गुरुपुत्रो वरं मूर्खस्तस्य सिद्ध्यन्ति नान्यथा ।
शुभकर्माणि सर्वाणि दीक्षाव्रततपांसि च ॥ १५६ ॥

अर्थ गुरुपुत्रः मूर्खः (अशिक्षितः, मन्दबुद्धिः) अपितस्य दीक्षाव्रत-तपस्यादीनि शुभकर्माणि सिद्धयन्ति, न वृथा भवन्ति ॥१५६॥

संसारमलनाशार्थम् भवपाशनिवृत्तये ।
गुरुगीताम्भसि स्नानं तत्त्वज्ञः कुरुते सदा ॥ १५७ ॥

अर्थ तत्त्वज्ञानी संसारमलनाशाय भवबन्धन-मुक्तये गुरुगीताजले , सदा स्नाति ॥ १५७ ॥

स एव च गुरुः साक्षात् सदा सद्ब्रह्मवित्तमः ।
तस्य स्थानानि सर्वाणि पवित्राणि न संशयः ॥ १५८ ॥

अर्थ यः सद्ब्रह्मवित्सु श्रेष्ठः स साक्षात् गुरुर्भवति, गुरुः येषु स्थानेषु निवसति तानि सर्वाणि स्थानानि पवित्राणि भवन्ति, अत्र न कश्चित् संशयः ॥ १५८ ॥

सर्वशुद्धः पवित्रोऽसौ स्वभावाद्यत्र तिष्ठति ।
तत्र देवगणाः सर्वे क्षेत्रे पीठे वसन्ति हि ॥ १५९ ॥

अर्थ सर्वशुद्धः पवित्रश्च गुरुदेवः यत्रापि स्वभावतः वसति, तस्मिन् क्षेत्रे पीठे वा सर्वे देवाः निवसन्ति ॥ १५९ ॥

आसनस्थः शयानो वा गच्छन् तिष्ठन् वदन् अपि ।
अश्वारूढो गजारूढः सुप्तो वा जागृतोऽपि वा ॥१६०॥
शुचिष्मांश्च सदा ज्ञानी गुरुगीताजपेन तु ।
तस्य दर्शनमात्रेण पुनर्जन्म न विद्यते ॥ १६१ ॥

अर्थ गुरुगीता जपेन पवित्रः ज्ञानी पुरुषः आसनस्थः, शयानः, गच्छन्, तिष्ठन्, वदन्, अश्वारूढः, गजारूढः, सुप्तः, जागृतो वा सदा विशुद्धः, यस्यां कस्यामपि अवस्थायां तस्य दर्शन पुनर्जन्म विनाशकं भवति ॥ १६०, १६१ ॥

समुद्रे च यथा तोयं क्षीरे क्षीरं घृते घृतम् ।
भिन्ने कुम्भे यथाकाशः तथात्मा परमात्मनि ॥ १६२ ॥

अर्थ यथ समुदे जलं, दुग्धे दुग्धं, घृते घृतम्, आकाशे घटाकाशश्च सम्मिलति, तथैव परमात्मनि जीवात्मा सम्मिलति ॥ १६२ ॥

तथैव ज्ञानी जीवात्मा परमात्मनि लीयते ।
ऐक्येन रमते ज्ञानी यत्र तत्र दिवानिशम् ॥ १६३ ॥

अर्थ तथा ज्ञानी जीवात्मा परमात्मनि लीनो भवति, एवमेकत्वं लक्षमानः ज्ञानी दिवानिशं कुत्रापि आनन्दे निमज्जति ॥१६३॥

एवंविधो महामुक्तः सर्वदा वर्त्तते बुधः ।
तस्य सर्वप्रयत्नेन भावभक्तिं करोति यः ॥ १६४ ॥
सर्वसंदेहरहितो मुक्तो भवति पार्वति ।
भुक्तिमुक्तिद्वयं तस्य जिह्वाग्रे च सरस्वती ॥ १६५ ॥

अर्थ एवं ज्ञानी सदा जीवन्मुक्तः सन् तिष्ठति, यः साधकः प्रयत्नपूर्वकं भावपूर्वाः सन् तस्मिन् भक्तिं करोति, स सन्देहरहितः सन् मुक्तो भवति, स भुक्तिं मुक्तिं च लभते, तस्य जिह्वाग्रे सरस्वती निवसति ॥ १६४,१६५ ॥

अनेन प्राणिनः सर्वे गुरुगीताजपेन तु ।
सर्वसिद्धिं प्राप्नुवन्ति भुक्तिं मुक्तिं न संशयः ॥ १६६ ॥

अर्थ गुरुगीताजपेन सर्वे प्राणिनः सर्वाः सिद्धयः लभन्ते, भुक्तिं मुक्तिं च प्राप्नुवन्ति, अत्र न संशयः ॥ १६६ ॥

सत्यं सत्यं पुनः सत्यं धर्म्यं सांख्यं मयोदितम् ।
गुरुगीतासमं नास्ति सत्यं सत्यं वरानने ॥ १६७ ॥

अर्थ मया प्रकाशितम् इदं धर्मयुक्त ज्ञानं: । सत्यं सत्यं पूर्णसत्यम्. हे सुमुखि, गुरुगीतासमं अपरं किञ्चित् नास्ति ॥ १६७ ॥

एको देव एकधर्म एकनिष्ठा परं तपः ।
गुरोः परतरं नान्यत् नास्ति तत्त्वं गुरोः परम् ॥ १६८ ॥

अर्थ एकः देवः, एकः धर्मः, एका निष्ठा, एतत् परमं तपः, गुरोः परं किमपि तत्त्वं नास्ति, गुरोः परं किमपि तत्त्वं नास्ति, गुरोः अधिकं किमपि तत्त्वं नास्ति ॥ १६८ ॥

माता धन्या पिता धन्यो धन्यो वंशः कुलं तथा ।
धन्या च वसुधा देवि गुरुभक्तिः सुदुर्लभा ॥ १६९ ॥

अर्थ हे देवि, गुरुभक्तस्य पितृ-मातृ-कुल-वंश-धरित्रयः धन्याः भवन्ति, गुरुभक्तिः अतीव दुर्लभा ॥ १६९ ॥

शरीरमिन्द्रियं प्राणाश्चार्थः स्वजनबान्धवाः ।
माता पिता कुलं देवि गुरुरेव न संशयः ॥ १७० ॥

अर्थ हे देवि, शरीरेन्द्रिय प्राण-धन-मातृ-पितृ-कुलस्वजनबान्धवाः - सर्वे गुरवः सन्ति, अत्र न संशयः ॥ १७० ॥

आकल्पजन्मना कोट्या जपव्रततपः क्रियाः ।
तत्सर्वं सफलं देवि गुरुसंतोषमात्रतः ॥ १७१ ॥

अर्थ हे देवि, केवलं गुरुसन्तोषमात्रेण कोटिजन्म-कृत-जपव्रततपांसि अन्यशास्त्रोक्तक्रियाश्च सफलीभवन्ति ॥ १७१ ॥

विद्यातपोबलेनैव मन्दभाग्याश्च ये नराः ।
गुरुसेवां न कुर्वन्ति सत्यं सत्यं वरानने ॥ १७२ ॥
ब्रह्मविष्णुमहेशाश्च देवर्षिपितृकिन्नराः ।
सिद्धचारणयक्षाश्च अन्येऽपि मुनयो जनाः ॥ १७३ ॥

अर्थ हे सुन्दरि, विद्याबलेन, तपोबलेन च गर्विताः मानवाः ब्रह्मा विष्णुः शिवः देवर्षिः, पितरः, किन्नराः, सिद्धचारणाः, य अन्ये मुनयश्च ये गुरुसेवां न कुर्वन्ति, ते अवश्यं मन्दभाग्या भवन्ति ॥ १७२,१७३ ॥

गुरुभावः परं तीर्थमन्यतीर्थम् निरर्थकम् ।
सर्वतीर्थाश्रयं देवि पादाङ्गुष्ठं च वर्त्तते ॥ १७४ ॥

अर्थ गुरुभावः एव श्रेष्ठं तीर्थम्, अन्यत् तीर्थं निरर्थकं भवति, हे देवि, श्रीगुरोः चरणाङ्गुष्ठम् आश्रित्य सर्वाणि तीर्थानि : वर्तन्ते ॥१७४॥

जपेन जयमाप्नोति चानंतफलमाप्नुयात् ।
हीनकर्म त्यजन्सर्वं स्थानानि चाधमानि च ॥ १७५ ॥

अर्थ अस्याः गुरुगीतायाः जपेन मनुष्यः जयं लभते, अनन्तफलं प्राप्नोति च, हीनकर्माणि अधमस्थानानि च परित्यज्य अस्या जपः कर्त्तव्यः ॥ १७५ ॥

जपं हीनासनं कुर्वन् हीनकर्मफलप्रदम् ।
गुरुगीतां प्रयाणे वा संग्रामे रिपुसंकटे ॥ १७६ ॥
जपञ्जयमवाप्नोति मरणे मुक्तिदायकम् ।
सर्वकर्म च सर्वत्र गुरुपुत्रस्य सिध्यति ॥ १७७ ॥

अर्थ हीनासनोपरि गुरुगीतायाः जपेन हीनफलं लभ्यते । प्रस्थानकाले, संग्रामे रिपुसंकटे च जपेन जयलाभः भवति, मरणेऽपि जपोऽयं मुक्तिं प्रददाति । गुरुपुत्रस्य सर्वाणि कर्माणि सर्वत्र सिध्यन्ति ॥ १७६,१७७ ॥

इदं रहस्यं नो वाच्यं तवाग्रे कथितं मया ।
सुगोप्यं च प्रयत्नेन मम त्वं च प्रियात्विति ॥ ॥१७८॥

अर्थ त्वं मम प्रियेतिकृत्वा गुरुगीतायाः रहस्यं तवाग्रे मया प्रकाशितम् । इदं कस्यापि पुरतः न वक्तव्यं, यत्नतः गोपनीयम् ॥१७८॥

स्वामिमुख्यगणेशादि-विष्णवादीनां च पार्वति ।
मनसापि न वक्तव्यं सत्यं सत्यं वदाम्यहम् ॥ १७९ ॥

अर्थ हे पार्वति, कार्त्तिकेय-गणेश-विष्णवादीनाम् इदं तत्त्वं मनसाऽपि न कथनीयम् । अहं त्वां सत्यं वदामि ॥ १७९ ॥

अतीवपक्वचित्ताय श्रद्धाभक्तियुताय च ।
प्रवक्तव्यमिदं देवि ममात्माऽसि सदा प्रिये ॥ १८० ॥

अर्थ हे देवि, यस्य चित्तं पूर्णतः परिपक्व श्रद्धा भक्तियुतं चास्ति तस्मै इदं तत्त्वं कथनीयम्। हे प्रिये त्वं सदा मम आत्माऽसि॥१८०॥

अभक्ते वंचके धूर्ते पाखंडे नास्तिके नरे ।
मनसाऽपि न वक्तव्या गुरुगीता कदाचन ॥ १८१ ॥

अर्थ भक्तिहीने प्रतारके नीचे पाखण्डे नास्तिके च इमां गुरुगीतां कथयितुं मनस्यपि विचारः न कर्त्तव्यः ॥ १८१ ॥

संसारसागरसमुद्धरणैकमन्त्रं
ब्रह्मादिदेवमुनिपूजितसिद्धमन्त्रम्।
दारिद्र्यदुःखभवरोगविनाशमन्त्रं
वन्दे महाभयहरं गुरुराजमन्त्रम् ॥ १८२ ॥

अर्थ संसारसागरात् उद्धारकम् एकमेव मन्त्रं, ब्रह्माविष्णुमहेशपुरन्दरादिदेवैः नारदादिभिः मुनिभिश्च पूजितं सिद्धमन्त्रं, दारिद्र-दुःखादिभवरोगविनाशक मन्त्रं, मृत्यूरूप-महाभयहारं च सर्वश्रेष्ठं भवरोगहरं गुरुगीतारूपं गुरुमन्त्रम् अहं नमामि ॥ १८२ ॥

इति श्रीस्कंदपुराणे उत्तरखण्डे
ईश्वरपार्वतीसंवादे गुरुगीता समाप्ता ।

॥ श्रीगुरुदेवचरणार्पणमस्तु ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

श्रीअवधूतस्तोत्रम्

नित्यानन्दाय गुरवे शिष्यसंसारहारिणे ।
भक्तकार्यैकदेहाय नमस्ते चित्सदात्मने ॥ १ ॥

अर्थ शिष्याणां संसारप्रपंचस्य हारकं, भक्तानां कृते एव देहधारिणं, नित्यं सच्चिदानन्दरूपं गुरुदेवम् अहं नमामि ॥ १ ॥

निर्वासनं निराकाङ्क्षं सर्वदोषविवर्जितम् ।
निरालम्बं निरातङ्कं नित्यानन्दं नमाम्यहम् ॥ २ ॥

अर्थ यस्य काऽपि वासना नास्ति, काऽपि इच्छा नास्ति, कश्चित् दोषः नास्ति, किमपि आलम्बनं नास्ति, किमपि दुःखं च नास्ति, तं नित्यानन्दं गुरुदेवमहं नमामि ॥ २ ॥

निर्ममं निरहंकारं समलोष्टाऽश्मकाञ्चनम् ।
समदुःखसुखं धीरं ह्यवधूतं नमाम्यहम् ॥ ३ ॥

अर्थ यस्य कस्मिन्नपि पदार्थे ममता नास्ति, यः अहंकाररहितः, यस्य दृष्टया प्रस्तर-लोह-सुवर्णानि समानानि, यः सुखे दुःखे च समानः, तं धैर्यवन्तम् अवधूतस्वामिनं अहं नमामि ॥ ३ ॥

अविनाशिनमात्मानं ह्येकं विज्ञाय तत्त्वतः ।
वीतरागभयक्रोधं नित्यानन्दं नमाम्यहम् ॥ ४ ॥

अर्थ यः एकम् अविनाशिनम् आत्मानं तत्त्वतः विजानाति, यः रागद्वेषभयक्रोधरहितः तं नित्यानन्दमहं नमस्करोमि ॥ ४ ॥

नाहं देहो न मे देहो जीवो नाहमहं हि चित् ।
एवं विज्ञाय सन्तुष्टं ह्यवधूतं नमाम्यहम् ॥ ५ ॥

अर्थ अहं न देहः, देहः न मम, अहं न जीवः, अहमेव चित्स्वरूपः अस्मि, एवं ज्ञात्वा यः सर्वदा सन्तुष्टः भवति, तम् अवधूतस्वामिनं अहं नमस्करोमि ॥ ५ ॥

समस्तं कल्पनामात्रं ह्यात्मा मुक्तः सनातनः ।
इति विज्ञाय संतृप्तं नित्यानन्दं नमाम्यहम् ॥ ६ ॥

अर्थ अन्यत् यत् किमप्यस्ति सर्वं कल्पनामात्रं, आत्मा तु सर्वदा संतृप्तः, तं नित्यानन्दमहं प्रणमामि ॥ ६ ॥

ज्ञानाग्निदग्धकर्माणं कामसंकल्पवर्जितम् ।
हेयोपादेयहीनं तं ह्यवधूतं नमाम्यहम् ॥ ७ ॥

अर्थ यः ज्ञानाग्निना सर्वकर्माणि भस्मीकरोति, यः कामनासंकल्पहीनः, यत्कृते न कोऽपि पदार्थः त्याज्यः न वा कोऽपि उपादेयः. तं अवधूतस्वामिनं नित्यानन्दमहं प्रणमामि ॥ ७ ॥

स्वभावेनैव यो योगी सुखं भोगं न वाञ्छति ।
यदृच्छालाभसन्तुष्टं नित्यानन्दं नमाम्यहम् ॥ ८ ॥

अर्थ यः स्वभावेन योगी, यस्य भोग-सुखेच्छा नास्ति, यः ईश्वरेच्छाप्राप्तपदार्थेन सन्तुष्टः, तं गुरुदेवं नित्यानन्दमहं प्रणमामि ॥८॥

नैव निन्दाप्रशंसाभ्यां यस्य विक्रियते मनः ।
आत्मक्रीडं महात्मानं ह्यवधूतं नमाम्यहम् ॥ ९ ॥

अर्थ कयापि प्रकारया निन्दया प्रशंसया च यस्य मनसि विकारः न उत्पद्यते, तम् आत्मक्रीडं (आत्मारामं) महान्तम् अवधूतस्वामिनं अहं प्रणमामि ॥ ९ ॥

नित्यं जाग्रदवस्थायां स्वप्नवद्योऽवतिष्ठते ।
निश्चिन्तं चिन्मयात्मानं नित्यानन्दं नमाम्यहम् ॥ १० ॥

अर्थ यः जाग्रदवस्थायामपि स्वप्नवत् तिष्ठति, (अर्थात् बाह्यपदार्थान् स्वप्नदृश्यवत् मनुते), यः कस्यापि विषयस्य चिन्तनात् मुक्तेः चिन्मयस्वरूपं तं नित्यानन्दस्वामिनम् अहं नमस्करोमि ॥१०॥

द्वेष्यं नास्ति प्रियं नास्ति नास्ति यस्य शुभाशुभम् ।
भेदज्ञानविहीनं तं ह्यवधूतं नमाम्यहम् ॥ ११ ॥

अर्थ यस्य केनापि सर्धं न द्वेषः, न वो प्रीतिः, यदर्थं न किमपि शुभं न वा अशुभं, यः द्वैतज्ञानरहितः, तं परमं अवधूतस्वामिनमहं प्रणमामि ॥ ११ ॥

जडं पश्यति नो यस्तु जगत्पश्यति चिन्मयम् ।
नित्ययुक्तं गुणातीतं नित्यानन्दं नमाम्यहम् ॥ १२ ॥

अर्थ यः जगतः किमपि पदार्थं जडं न मन्यते, अपितु जगत् चिन्मयरूपं पश्यति, यः नित्ययोगी, त्रिभ्यः गुणेभ्यः अतीतश्च तं नित्यानन्दं भगवन्तमहं नमस्करोमि ॥ १२ ॥

यो हि दर्शनमात्रेण पवते भुवनत्रयम् ।
पावनं जंगमं तीर्थं ह्यवधूतं नमाम्यहम् ॥ १३ ॥

अर्थ यः दर्शनमात्रेण त्रीन् लोकान् पुनाति, सर्वपवित्रं चलतीर्थं तं अवधूतस्वामिनं अहं नमस्करोमि ॥ १३ ॥

सर्वपूज्यं सदा पूर्णं ह्यखण्डानन्दविग्रहम् ।
स्वप्रकाशं चिदानन्दं नित्यानन्दं नमाम्यहम् ॥ १४ ॥

अर्थ सर्वेषां जनानां पूज्यं, सर्वदा पूर्णस्वरूपम्, अखण्डानन्दशरीरं, स्वयं प्रकाशितं चिदानन्दस्वरूपं गुरुदेवं नित्यानन्दमहं प्रणमामि ॥ १४ ॥

निष्कलं निष्क्रियं शान्तं निर्मलं परमामृतम् ।
गणेशपुरीवासिनं ह्यवधूतं नमाम्यहम् ॥ १५ ॥

अर्थ कलारहितं, क्रियारहितं, शान्तं, निर्मलं,परमामृतरूपं, गणेशपुर्यां वसन्तम् अवधूतस्वामिनमहं प्रणमामि ॥ १५ ॥

योगपूर्णं तपोमूर्त्तिं प्रेमपूर्णं सुदर्शनम् ।
ज्ञानपूर्णं कृपामूर्तिं नित्यानन्दं नमाम्यहम् ॥ १६ ॥

अर्थ सर्वैः योगैः पूर्णं, साक्षात् तपसः मूर्तिः, प्रेममयं, यस्य च दर्शनम् आनन्ददायकम्, एवं ज्ञानपूर्णं साक्षत्कृपावतारं स्वामिनं नित्यानन्दं भगवन्तमहं प्रणमामि ॥ १६ ॥

'सद्गुरुनाथ महाराजकी जय' ।

प्रार्थना

दुर्जनः सज्जनो भूयात् सज्जनः शान्तिमाप्नुयात् ।
शान्तो मुच्येत बन्धेभ्यो मुक्तश्चान्यान् विमोचयेत् ॥

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥

काले वर्षतु पर्जन्यः पृथिवी शस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत् ॥

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥

स्वस्ति मात्र उत पित्रे नो अस्तु
स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।
विश्वं सुभूतं सुविदत्रं नो अस्तु
ज्योगेव दृशेम सूर्यम् ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ज्योत से ज्योत जगावो

ज्योत से ज्योत जगावो सद्‌गुरु ज्योत से ज्योत जगावो;
मेरा अंतर-तिमिर मिटावो, सद्‌गुरु ज्योत से ज्योत जगावो।

हे योगेश्वर, हे ज्ञानेश्वर, (२) हे सर्वेश्वर, हे परमेश्वर, (२)
निज कृपा बरसावो - सद्‌गुरु ज्योत से ...

हम बालक तेरे द्वारपे आये, (२)
मंगल दरस दिखावो - सद्‌गुरु ज्योत से ...

शीश झुकाय करे तेरी आरती, (२)
प्रेमसुधा बरसावो - सद्‌गुरु ज्योत से ...

अन्तरमें युग युग से सोई, (२)
चितिशक्ति को जगावो - सद्‌गुरु ज्योत से ...

साची ज्योत जगे ही हृदय में, (२)
सोऽहं नाद जगावो - सद्‌गुरु ज्योत से ...

जीवन मुक्तानंद अविनाशी, (२)
चरनन शरण लगावो - सद्‌गुरु ज्योत से ...

त्वमेव माता च पिता त्वमेव, त्वमेव बंधु श्च सखा त्वमेव।
त्वमेव विद्या, द्रविणं त्वमेव, त्वमेव सर्वं मम देवदेव ॥

दूर करो दुःख दर्द सब, दया करो भगवान ।
मन-मंदिर में उज्ज्वल हो तेरा निर्मल ज्ञान ॥

जिस घर में हो आरती चरणकमल चित लाग ।
तहां हरि वासा करे ज्योत अनंत जगाय ॥

जहां भक्त कीर्तन करे, बहे प्रेम दरियाय ।
तहां हरि श्रवण करे सत्य लोक से आय ॥

सब कुछ दिया आपने, भेंट करूं क्या नाथ ।
नमस्कार की भेंट करूं जोडूं मैं दोनों हाथ ॥ (२)

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

सद्गुरुनाथ महाराज की जय ।

Acc. 23684
23645



बालयोगी श्री नित्यानन्द महाराज

६८/४

आदिगुरु

श्री महादेव उवाच

सत्यं सत्यं पुनः सत्यं
धर्म्यं साख्यं मयोदितम् ।
गुरुगीतासमं नास्ति
सत्यं सत्यं वरानने ॥

श्री स्कंद पुराणे, उत्तरखंडे.